M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 879

Title: Dasaka Purna Māsā
Hellā

879

879

दर्शपूर्णमासहोत्र

Darsha Poornamāsa Hotra	Title
	Author
	Editor
	Year, Vols.
	Publisher
879	Remarks

श्रीगणेशायनमः अथदर्शपूर्णमासहौत्रप्रारंभः॥ होतामंत्रितःप्राङुदङ्माहवनीयादवस्थायप्राङ्मुखोवांयज्ञोपवीत्याचम्यद
१ क्षिणाग्राद्विहारंप्रपद्यतेऽपरेणोत्करमपरेणप्रणीतोन्वाहार्यधोमपरेणप्रणीतेचात्वालंचात्वालचत्स्वेनतीर्थमत्यावस्र
त्तेप्रपद्यामिहृतत्तरेणपादेनवेदिंश्रोणयोत्तरयापाश्र्म्यं३ समांनिधायप्रपदेनबर्हिराक्रम्यसंहितौपाणीधारयन्नेत्का
शवत्यंगुलीहृदयसंमितावंकसंमितौवाद्यावापृथिव्योःसंधिमीक्षमाणएतद्योनुःस्थानभासनंवासवत्रैवंभूतोव
चनादन्यत्रैवचितोजपति॥ नमःप्रवक्त्रेनमउपद्रष्ट्रेनमोनुख्यात्रेकइदमनुवक्ष्यातिइदमनुवक्ष्यानितिवल्मीवीरंहसस्यांतु
द्यौश्चपृथिवीचाहश्चरात्रिश्चापश्चौषधयश्चवाक्समस्थितयज्ञःसाधुकृद्दांसिप्रपद्येहमेवमां॥ अमुकशर्माणंभूतेभवि
ष्यतिजातेजनिष्यमाणआभजाम्यपाथेवान्नोअशांतिंवदेत्स्वगुरुश्याल्पवहत्ष्यजातवेदोरमपापश्चन्मयीतिप्रतिसंदधातु॥ व
मीमेद्यावापृथिवीवर्माग्निर्वर्मसूर्योवर्ममेसंतुतिराश्चिका॥ तदद्यवाचःप्रथमंमसीययेनासुरांअभिदेवाअसाम ऊर्जादउतय
ज्ञियासःपंचजनानाममहोत्रंजुषध्वं॥ हिं३ भूर्भुवःस्वरों३ प्रवोवाजाअभिद्यवोहविष्मंतोघृताच्यादेवांजिगातिसुम्नयों३ त्रिः॥ अग्न
आयाहिवीतयेगृणानोहव्यदातये॥ निहोतासत्सिबर्हिषों३ तंत्वासमिद्भिरंगिरोघृतेनवर्धयामसि॥ बृहच्छोचायविष्ठ्यों३ सन
१

पृथुश्रवाय्यमथादेवविवासासिबृहदग्नेसुवीर्यों३ मीळेन्योनमस्यस्तिरस्तमांसिदर्शतः॥ समग्निरिध्यतेवृषाश्वोनदेववाहनः॥
वंहविष्मंतईळतों३ वृषणंत्वावयंवृषन्वृषणःसमिधीमहि॥ अग्नेदीद्यतंबृहों३ मग्निंदूतंवृणीमहेहोतारंविश्ववेदसं॥ अस्य
यज्ञस्यसुक्रतों३ समिध्यमानोअध्वरेग्निःपावकईड्यः॥ शोचिष्केशस्तमीमहों३ समिद्धोअग्नआहुतदेवान्यक्षिस्वध्वर॥ त्वं
हिहव्यवाळसों३ माजुहोताद्वस्यताग्निंप्रयत्यध्वरेवृणीध्वंहव्यवाहनों३ माजुहो०रे॥ वृणीध्वं० नों३माजु० रेवृणीध्वंहव्यवाहनो
३ मग्नेमहांअसिब्राह्मणभारत॥ निगदेवसोसाध्य॥ यजमानस्यर्षेयाश्चवृणीतेयावंतस्युःपरंपरंप्रथमं॥ देवेद्धोमान्विद्धऋ
षिष्टुतोविप्रानुमदितःकविशस्तोब्रह्मसंशितोघृताहवनःप्रणीर्यज्ञानांरथीरध्वराणामतूर्तोहोतातूर्णिर्हव्यवाट्॥ इत्यवसा
य॥ भुवनमसीत्यभिज्ञाय॥ आस्पात्रंजुहूर्देवानांचमसोदेवपानोरां ६ वाग्नेनेमिर्देवांस्त्वंपरिभूरस्यावहदेवान्यजमानाय॥ २
अग्निमग्नआ३ वह॥ सोममा३ वह॥ अग्निमा३ वहीउपांशुविष्णुमा३ वह॥ अग्नीषोमावा३ वह॥ इंद्रंवेमृधमावह॥ देवांआ
ज्यपांआ३ वह॥ अग्निंहोत्रायावह स्वंमहिमानमा३ वह॥ आवहजातवेदःसुयजायज॥ इतिपौर्णमास्यां॥ अमावास्यायांतु॥ अग्नि
मग्न॥ सोममा० अग्निमा० उ० विष्णुं० इंद्राग्नीआ३ वह॥ देवांआज्यपांआ३० अग्निंहोत्राया० आवहजातवेदःसुयजायज॥ इत्या

२ बाहू॥ यथास्थितमूर्ध्वज्ञानुरूपविश्योदग्वेदेर्व्युद्धत्वाग्निभ्यो प्राक् शंकुर्यात्॥ अदितिर्माता स्यां न रिसान्मा छेत्सीरिदमहमग्नि
नादेवेन देवतयाग्निवता स्तोमेन रथंतरेण साम्ना गायत्रेण छंदसाग्निष्टोमेन यज्ञेन वषट्कारेण वज्रेण यो स्मान्द्वेष्टि यं च वयं द्वि
ष्मस्तं हन्मि। आश्रावयंतमनुमंत्रयेत। आश्रावय यज्ञं देवेषु श्रावय मां मनुष्येषु कीर्त्यै यशसे ब्रह्मवर्चसायेति प्रवृत्यानं॥
देवसवितरेतं त्वा वृणतेग्निं होत्राय सह पित्रा वैश्वानरेण द्यावापृथिवी मां पातामग्निहोता हमानुषः॥ मानुष इत्यध्वर्योः श्रु
त्वा। उदायुषा स्वायुषोदोषधीनां रसेनोत्पर्जन्यस्य धामभिरुदस्थाममृतां अनु। इत्युत्तिष्ठेत्॥ पादेश्चाध्वर्योनिवर्तिष्व पा
शा अग्निं होतारमंतराविचक्षणाः॥ सिनंतिपाकमतिधीरयेति उत्थाय जपति॥ ऋतस्य पंथामन्वेमि होता। अभिक्रम्यांसे अ
ध्वर्युमन्वारभेत। पार्श्वस्थेन पाणिना श्रीधमंकुदेशेन सव्येन वा॥ इदमन्वारभामहे होतृचूर्येपुरोहितं॥ येनायं ननमं त्वदें
वा अंगिरसो दिवं॥ संमार्गेणत्सोस्त्रिरभ्यात्मामुखं संमृजीत॥ संमार्गोसि सं मां प्रजाया पशुभिर्मृद्धीस बृहन्मंत्रेण द्धिस्तः द्वी
स्पृष्टोदकं॥ होतृषदनमभिमंत्रयेत॥ अहे दैधिषव्योदतस्तिष्ठान्यस्य सदने सीद योस्मत्पाकतरः॥ निरस्तः परावसुः॥ अ
प्रत्यग पवपपश्य॥ इत्यंगुष्ठेयकनिष्ठिकाभ्यां होतृषदनात्तृणं संगृह्य दक्षिणा निरसेत्॥ इदमहमर्वावसोः सदने सीदामीत्युपविशेत्तद
क्षिणोत्तरेणोपस्थेन। देवं बर्हिस्त्वा मा सस्थं त्वा धा सदेयं जपति॥ अभिहिषहोतः प्रतरां बर्हिषद्भव॥ जानुनिरसा वर्हिरूप २

स्पृशातऊर्ध्वं जपेत्॥ भूतपतये नमो भुवनपतये नमो भूतानां पतये नमो भूताय नमः प्राणं प्रपद्ये पानं प्रपद्ये व्यानं प्रपद्ये वाचं
प्रपद्ये चक्षुः प्रपद्ये श्रोत्रं प्रपद्ये नमः प्रपद्य आत्मानं प्रपद्ये गायत्रीं प्रपद्ये त्रिष्टुभं प्रपद्ये जगतीं प्रपद्येनुष्टुभं प्रपद्ये छंदांसि प्रपद्ये॥
सूर्यो नो दिवस्पातु ऋचा नमो महद्भ्यो नमो अर्भकेभ्यो०॥ विश्वे देवाः शास्तन मा यथेह०॥ अराधि होता निषदा यजीयान्०॥ त
दद्य वाचः प्रथमं मसीय०॥ समाप्यप्रदीप्त इध्मेस्तु वाचा वादापयेन्निगदेन॥ अग्निर्होता वेत्त्वग्निर्होत्रं वेत्तु प्रावित्रं साधु ते य
जमान देवता यो अग्निं॥ अपांशु होतारमवृथाः॥ इति जपेत्॥ घृतवतीमध्वर्योः स्रुचमास्यस्व देवयुवं विश्ववारे ईळाम
हे देवां ईळेन्यान्नमस्याम नमस्याम यज्ञियान्॥ प्रयाजाः एकैकं प्रेषितो यजति॥ ये३ यजामहे समिधः समिधो अग्न आज्यस्य व्यं
तु३वौ३षट्॥ वागोजः सह ओजो मयि प्राणापानौ वषट्कारमुत्को स्क्वानुमंत्रयेत॥ ये३ यजामहे तनूनपादग्न आज्यस्य वेतु
३वौ३षट् वासिष्ठशुनकात्रिवध्र्यश्वराजन्यानां तनूनपात्स्थाने नराशंसः॥ ये३ यजामहे नराशंसो अग्न आज्यस्य वेतु३वौ
३षट्॥ ये३ यजामह इळो अग्न आज्यस्य व्यंतु३वौ३षट्॥ ये३ यजामहे बर्हिरग्न आज्यस्य वेतु३वौ३षट्॥ ये३ यजामहे स्वा
हाग्निं स्वाहा सोमं स्वाहा उपा० विष्णुं स्वाहाग्नीषोमौ स्वाहेंद्रं वैमृधं स्वाहा देवा आज्यपा जुषाणा अग्न आज्यस्य व्यंतु३वौ
षट्॥ इति पौर्णमास्यां। अमावास्यायां तु॥ ये३० स्वाहाग्निं स्वाहा सोमं स्वाहाग्निं स्वाहा उ० विष्णुं स्वाहेंद्राग्नी स्वाहा देवा आज्य०

३ पाजुषाणा अग्न आज्यस्य व्यंतु २ वौषट्॥ वार्त्रघ्ना वाज्यभागौ पौर्णमास्यां॥ अग्निर्वृत्राणि जंघनत्० या॥ मासि इंद्रः शुक्र आहुतीं ३॥
ये३ यजामहे ग्निं जुषाणो अग्निराज्यस्य वेतु वौषट्॥ त्वं सोमासि सत्पति० हा॥ त्वं भद्रो असि क्रतो ३॥ ये० सोमं जुषाणः सोम
आज्यस्य हविषो वेतु वौषट्॥ वृधन्वंता वाज्यभागा वमावास्यायां॥ अग्निः प्रत्नेन मन्मना० स्वां॥ कविर्विप्रेण वावृधे ३॥ ये०
ग्निं जुषाणो ग्निराज्यस्य वेतु०॥ सोम गीर्भिष्ट्वा० दा॥ सुमृळीको न आविश० ३॥ ये० सोमं जुषाणः सोम आज्यस्य हविषो
वेतु० ३ वा० प्रधानं॥ अग्निर्मूर्धा० तौ ३॥ ये० ग्निं भुवो यज्ञस्य रजसश्च० हव्यवाहं वौ०॥ उपांशुयाजः इदं विष्णुर्विचक्रमे० समूळ्हे
३० ये० विष्णुं त्रिर्देवः पृथिवीमेष एतां० नामा वौ०॥ अग्नीषोमा सवेदसा० वर्धयं॥ ये० हेग्नीषोमौ सुवमेता निविदि विरोच
ना० ग्रभीतान्वौ०॥ विन इंद्र मृधो जहि० तमौ॥ ये० हइंद्र वैमृधं मृगो न भीमः कुचरो गिरिष्ठाः० उदस्वाषौ०॥ इति पौर्ण
मास्यां॥ अमावास्यायां तु॥ आज्यभागानंतरं॥ अग्निर्मू० ये० ग्निं भुवो न्वौ० इदं वि० ये० हे विष्णुं त्रिर्देव पृ० भा वौ० इंद्राग्नी
अवयागत० ईशतौ ३॥ ये० महइंद्राग्नी गीर्भिर्ना वमः प्रमृतिमिच्छमान० देष्ठे वौ०॥ अथ स्विष्टकृतः॥ पिप्रीहि देवान् उशतो य
विष्ठ० यजिष्ठं॥ येयजामहे ग्निं स्विष्टकृतमयाळग्निरग्नेः प्रियाधामान्ययाट् सोमस्यानि याधामान्ययाळग्नेः प्रियाधामा
न्ययाट्० विष्णोः ३ ग्नेः प्रियाधामान्ययाळग्नीषोमयोः प्रियाधामान्ययाळिंद्रस्य वैमृधस्य प्रियाधामान्ययाट् देवानामाज्य २

पानां प्रियाधामानि। यक्षदग्नेर्होतुः प्रियाः न नानि यक्षत्स्वं महिमानमायजतामेज्या इषः कृणोतु सो अध्वरा जातवेदा जु
षतां हविरग्ने यदद्य विशो अध्वरस्य होतः पावक शोचे वेष्ट्वं हि यज्वा ऋता यजासि महिना वि यद्भूर्हव्या वह यविष्ठ या ते अद्य वौ३षट्॥
इति पौर्ण० अमावास्या०॥ ये० ग्निं स्विष्टकृतं० न्ययाट् तामङ्प० ळग्नेः प्रि० विष्णोः० ळिंद्राग्नयोः प्रियाधामान्ययाळ्देवाना
माज्य० यविष्ठ या ते अद्य वौ३षट्॥ प्रचरितम्याः पर्वणीनतमे अंनयित्वा प्रवीरभ्या त्वनिमार्ष्टि वाचस्पतिना ते हुतस्येषे प्रा
णाय प्राश्नामीत्युत्तरयुत्तरे पनसस्पतिनाते हुतस्योर्जे पानाय प्राश्नामीत्य धरमधरे स्पृशेदकं। अंनलिनेळां प्रतिगृह्य सव्ये
पाणौ कृत्वा पश्चात् स्यादंगगुलिपाणिमुपधाया तंनरेळामवदाय यीतां तरणां गुष्टमंगुली अश्वस्वे यं द्वितीयमादद्रीत प्रसा
लब्धामं गुष्ठेनाभिसंगृह्य प्रस्याद्दृ सांगुलीरमुष्टिं कृत्वा दक्षिणा तइळां प्रतिगृह्णास्यसंमितामुपह्वयत प्राच्या संमितां वा॥ इळो
पहूता सह दिवा बृहतादित्येनोपात्मा इळाह्वयतां सह दिवा बृहतादित्येनेळोपहूता सहांतरिक्षेण वामदेव्येन वायुनोपास्मां
इळाह्वयतां सहांतरिक्षेण वामदेव्येन वायुनेळोपहूता सह पृथिव्या रथंतरेणाग्निनोपास्मां इळाह्वयतां सह पृथिव्या
रथंतरेणाग्निना॥ उपहूता गावः सहाशिर उपमां गावः सहाशिरा ह्वयंतामुपहूता धेनुः सहर्षभ उपमां धेनुः सहर्षभा
ह्वयतामुपहूता गौर्घृतपद्युप मां गौर्घृतपदी ह्वयतामुपहूता दिव्याः सप्तहोतार उपमां दिव्याः सप्तहोतारा ह्वयंतामुपहू

५ ता सखा भक्ष उपमां सखा भक्षो ह्वयतामुपहूतेळा वृष्टिरुपमामिळा वृष्टिर्ह्वयतामि सुपर्णाय योच्चः॥ इळ्ये पहूतोपहूते स्ते पास्मां
उ ह्वाह्वयतामिळोपहूता॥ मानवी घृतपदी मैत्रावरुणी ब्रह्मदेवकृतमुपहूतं दैव्या अध्वर्यव उपहूता उपहूता मनुष्या॥ य इमं
यज्ञमवान्ये च यज्ञपतिं वर्धानुपहूते द्यावापृथिवी पूर्वजे ऋतावरी देवी देवपुत्रे॥ उपहूतोयं यजमान उत्तरस्यां देवयज्यायामु
पहूतो भूयसि हविष्करण इदं मे देवा हविर्जुषंतामिति तस्मिन्नुपहूतः॥ इत्युपहूय अवांतरेळां प्राश्नीयात्॥ इळ भागं जुष
स्व नः पिन्व गा जिन्वार्वतो राय स्पोषस्येशिषे तस्य नो रास्व तस्य नो दास्तस्यास्ते भागमशीमहि सर्वात्मानः सर्वतनवः सर्ववी
राः सर्वपूरुषाः सर्वपुरुषा इति वा॥ अवांतरेळां प्राश्य पाणी मार्जयित्वानुयाजेभ्यः श्रवं तिपरिस्तरणे रंनालिमंत द्यांयाप आ
सेचयते तन्मार्जनं॥ क इदं कस्मा अदात्कामः कामायादात्कामो दाता कामः प्रतिग्रहीता कामं समुद्रमाविश कामेन त्वा प्र
तिगृह्णामि कामैतत्ते॥ वृष्टिरसि द्यौस्त्वा ददातु पृथिवी प्रतिगृह्णातु॥ यथाभागं प्रतिगृह्णामि॥ देवा दयो नुयाजा वी
नवृत्सदं ता स्त्र्य एकुर्क प्रेषितो यजति॥ देवं बर्हिर्वसुवने वसुधेयस्य वेत्वू३ वौषट्॥ देवो नराशंसो वसुवने वसुधेय
स्य वेतु३ वौ३षट्॥ देवो अग्निः स्विष्टकृत् सुद्रविणा मंद्रः कविः सत्यमन्मा यजी होता होतुर्होतुरायजीयानग्ने यान्देवान्या
क्षा अपिप्रेर्ये ते होत्रे अमत्सत तां ससनुषीं होत्रां देवंगमां दिवि देवेषु यज्ञमेरयेमं स्विष्टकृच्चाग्ने होता भूर्वसुवने वसुधेयस्य ५

नमोवाके वीहि वौ३षट्॥ अनुवाजं यजति प्रह्रस्यावा॥ सूक्तवाय संप्रेषितः॥ इदं द्यावापृथिवी भद्रमभूदार्ध्म सूक्तवाकमु
त नमोवाकमृध्यास्म सूक्तोच्यमग्ने त्वं सूक्तवागसि॥ उपश्रुती दिवस्पृथिव्योरोमन्वती तेस्मिन्यज्ञे यजमान द्यावापृथि
वी स्तां॥ शंगयी जीरदानू अत्रस्नू अप्रवेदे उरुगव्यूती अभयं कृतौ॥ वृष्टिद्यावा रीत्यापा शंभुवौ मयोभुवा ऊर्जस्वती पयस्व
ती सूपचरणा च स्वधिचरणा च तयोराविदि॥ अग्निरिदं हविरजुषतावीवृधत महो ज्यायोकृत॥ सोम इदं हवि०। अग्नि
रिदं हवि०। विष्णुरिदं हवि०। अग्नीषोमाविदं हविरजुषेतामवीवृधेतां महो ज्यायोक्राता॥ इंद्राग्नी वैमृध इदं हवि०। देवा आज्य
पा आज्यमजुषंतावीवृधंत महो ज्यायोकृत॥ अग्निर्होत्रेणेदं हवि०। अस्यामृधेद्धोत्रायां देवंगमायामाशास्तेयं यजमा
नः॥ असुकशर्मा असुकनक्षत्रः॥ आयुराशास्ते सुप्रजास्त्वमाशास्ते रायस्पोषमाशास्ते सजातवनस्यामाशास्ते उत्तरां
देवयज्यामाशास्ते भूयो हविष्करणमाशास्ते दिव्यं धामाशास्ते विश्वं प्रियमाशास्ते यदनेन हविषाशास्ते तदश्यात्तदृध्या
त्तदस्मै देवा रासंतां तदग्निर्देवो देवेभ्यो वनते वयमग्नेर्मानुषाः॥ इष्टं च वीतं चोभे च नो द्यावापृथिवी अंहसस्पातां
मेह गतिर्वामस्येदं नमो देवेभ्यः॥ इतिपो० अमावा० अग्निरिदं० सोमइदं० अग्निरिदं० विष्णुरिदं० इंद्राग्नी हविरजुषेतां०
क्राता० देवा आज्यपा० अग्निर्होत्रेणेदं० अस्यामृधे० शंयुवाकाय संप्रेषितः। तच्छंयोरावृणी० वेदमस्मै प्रयच्छ र्युस्तंग्रह्णीया

५ नू॥ वेदोसिवेदोविदेय। वेदंगृहीत्वा। उदायुषेत्येतेनोत्थाय पश्चाद्गार्हपत्यस्योपविश्य। सोमंत्वष्टारंदेवानांपत्नीरग्निंगृहपति
मित्याज्येनयजंति॥ आप्यायस्वसमेतुतेविश्वतः सोमवृष्ण्यं॥ भवावाजस्यसंगथे॥ ३॥ ये २ यजामहेसोमं संतेपयांसिसमुयंतुवाः
जाः संवृष्ण्यान्यभिमातिषाहः। आप्यायमानोअमृतायसोमदिविश्रवांस्युत्तमानिधिष्व ३ वौ ३ षट्॥ इह त्वष्टारमग्रियंविश्व
रूपमुपह्वये॥ अस्माकमस्तुकेवलो॥ ये० त्वष्टारंतन्नस्तुरीपमध्यपोषयित्नुदेवत्वष्टर्विरराणः स्यस्व। यतोवीरः कर्म
ण्यः सुदक्षोयुक्तग्रावाजायतेदेवकामा ३ वौ ३ षट्॥ राकामहंसुहवांसुष्टुतीहुवेशृणोतुनः सुभगाबोधतुत्मना। सीव्यत्वपः सूच्या
च्छिद्यमानयाददातुवीरंशतदायमुक्थ्यं॥ ये० राकेयास्तेराकेसुमतयः सुपेशसोयाभिर्ददासिदाशुषेवसूनि॥ ताभिर्नोअद्य
सुमनाउपागहिसहस्रपोषंसुभगेरराणा ३ वौ ३ षट्। सिनीवालिपृथुष्टुके यादेवानामसिस्वसा॥ जुषस्वहव्यमाहुतंप्रजांदेविदिदि
ड्ढिनः॥ ये० सिनीवालीयासुबाहुः स्वंगुरिः सुषूमाबहुसूवरी॥ तस्यैविश्पत्न्यैहविः सिनीवाल्यैजुहोतना ३ वौ ३ षट्॥ कुहूमहंसुवृतंवि
द्मनापसमस्मिन्यज्ञेसुहवांजोहवीमि। सानोददातुश्रवणंपितॄणां तस्यैतेदेविहविषाविधेम॥ ये० कुहूर्देवानाममृतस्यपत्नीहव्यानोअस्य
हविषः शृणोतु॥ संदाशुषेकिरतुभूरिवामंरायस्पोषंयजमानेदधातु ३ वौ ३ षट्॥ देवानांपत्नीरुशतीरवंतुनः प्रावंतुनस्तुजयेवा
जसातये। याः पार्थिवासोयाअपामपिव्रतेतानोदेवीः सुहवाः शर्मयच्छत ३ ये० देवानांपत्नीरुशत्याअवंतुदेवपत्नीरिंद्राण्यग्नाय्य ५

श्विनीराट्। आरोदसीवरुणानीशृणोतुव्यंतुदेवीर्यऋतुर्जनीनां ३ वौ ३ षट्॥ अनुनोद्यानुमतिर्यज्ञंदेवेषुमन्यतां॥ अग्निश्चहव्यवाहन
नोभवतंदाशुषेमयः॥ ये० हेन्वनुमतेत्वंमन्याससेशंचनस्कृधि। क्रत्वेदक्षायनोहिनुप्रणआयूंषितारिषः ३ वौ ३ षट्॥ अ दै
ग्निर्होतागृहपतिः सराजाविश्ववेदजनिमाजातवेदाः। देवानामुतयोमर्त्यानांयजिष्ठः सप्रयजतामृतावा॥ ये० हेऽग्निर्गृहपतिर्हव्य
वाळग्निरजरः पितानोविभुर्विभावासुदृशीकोअस्मे। सुगार्हपत्याः समिषोदिदीह्यस्मद्र्यक्संमिमीहिश्रवांसि ३ वौ ३ षट्। वाच
स्पतिनातेन्याहितास्मिन्नुपहूतइत्यंतंपूर्ववत्॥ वेदंपत्न्यैप्रदायवाचयेद्धातारंवा॥ वेदोसिवित्तिरसिविदेयकर्मासिकरणमसिक्रि
यासंसनिरसिसनितास्यघृतवंतंकुलायिनंरायस्पोषंसहस्रिणं वेदोददातुवाजिनंयंवहवउपजीवंतियोजनानामसपत्नी॥ तं
विदेयकामायत्वा। वेदशिरसानाभिदेशमालभेतप्रजाकामाचेत्। अथास्यायोक्त्रंविमुंचति। प्रत्वामुंचामिवरुणस्यपाशाद्येन
त्वाबध्नात्सवितासुशेवः। ऋतस्ययोनौसुकृतस्यलोके स्योनंत्वासहपत्यादधामि॥ तत्स्त्र्यगगार्हपत्याद्धिगुणीप्राक्स्याशांति
धायोपरिष्टाद्धोस्यादग्रमपिवेदतृणानिकरोति। पुरस्तात्पूर्णपात्रंसा[illegible]वेदतृणोराभिमंत्रयवाचयेत्। पूर्णमसिपूर्णंमेभूय
याः सुपूर्णमसिसुपूर्णंमेभूयाः सदसिसन्मेभूयाः सर्वमसिसर्वंमेभूयाः अक्षितिरसिमामेक्षेष्ठाः। प्राच्यांदिशिदेवाऋत्वि
जोमार्जयंतांदक्षिणस्यांदिशिमासाः पितरोमार्जयंतांप्रतीच्यांदिशिगृहाः पशवोमार्जयंतांउदीच्यांदिशिआपओषधयोवन

स्पत्तयोमार्जयंतामद्धर्वायांदिशिपत्तुः संवत्सरः प्रजापतिर्मार्जयंतांमार्जयंतामितिवा॥ अथास्याउत्तानंसंजालिमधस्ता
६ द्योत्क्रस्तानिधायात्मनश्चस्तव्यपूर्णपात्रंनिनयन्वाचयेत्। माहृप्रजोपराःसिचंयानःसयावरीःस्कन। समुद्रेवोनिनेयानिस्वंपाथो
अपीथ्या। वेदस्तृणान्यग्नेर्गृहीत्वाविधूनंत्संततंस्तृणंत्संवेनगार्हपत्याराद्दृवनीयमेति॥ तंतुंतन्वन्नजसोभानुमन्विहिज्योति
ष्मतः पथोरक्षधियाकृतान्। अनुल्बणंवयतजोगुवामपोमनुर्भवजनयादैव्यंजनं॥ इतिशेषंनिधायप्रस्त्रगुदगाहवनीया
दृवस्त्रायस्त्रात्याःस्कवेणाहायसर्वप्रायश्चित्तानिजुहुयात्स्वाहाकारांतैर्मत्रैः॥ अयाश्चाग्नेस्यनभिशस्तीश्चसत्यमित्वम
याअसि। अयासान्वयसाहृतोयासन्हव्यमूहिषेयानोधेहिभेषजंस्वाहा॥ अतोदेवा० इदंविष्णुर्विचक्रमे०॥ भूःस्वाहा। भुवः
स्वाहा। स्वःस्वाहा। भूर्भुवःस्वःस्वाहा। ॐ चमेस्वरश्चमेयज्ञोपचतेनमश्च॥ यतेन्यूनंतस्मैतउपयन्नेतिरिक्तंतस्मैतेनमः॥
इतिसंस्थाजपइतिहोतुः॥ इतिप्रकृतिहौत्रंसमाप्तं॥ पाथिकृतोविशेषः॥ वेत्थाहिवेधोअध्वनःपथश्चदेवांजसा॥ अग्नेय
ज्ञेषुसुक्रतो॥ येऽपजामदेग्निपथिकृतआदेवानामपिपंथामगन्मयच्छक्नवामतदनुप्रवोढु॥ अग्निर्विद्वान्सयजात्सेदु
होतासोअध्वरान्सऋतून्कल्पयातीवौषट्। पुरोनुवाक्यायाज्याउपांशु॥ इतिपाथिकृतविशेषः॥ ॥संवत्१८०० माह ६
सुदी१ भृगुवासरेणइदंपुस्तकं॥ ॥श्री॥ ॥छ॥ ॥श्री॥ ॥छ॥ ॥श्री॥ ॥छ॥ ॥छ॥ ॥